# shivabhaktalakShaNam by ShridharavenkatArya

# શ્રી શ્રીધરવેઙ્કટાર્યકૃતૌ શિવભક્તલક્ષણમ્

## Document Information

Text title : Shivabhakta Lakshanam

File name : shivabhaktalakShaNam.itx

Category : shiva, shrIdhara-venkaTesha

Location : doc_shiva

Author : Shridharavenkatesa of Tiruvisanallur or Ayyaval with respect

Latest update : November 16, 2019

Send corrections to : sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

April 28, 2023

*sanskritdocuments.org*

# શ્રી શ્રીધરવેઙ્કટાર્યકૃતૌ શિવભક્તલક્ષણમ્

શિવાભ્યાં નમઃ ।
અથ શિવભક્તલક્ષણં પ્રારમ્ભઃ ।
નાથ ત્વદીયમભિધાનમુપાશ્રિતાનાં
    ક્રોધસ્મરાદિક કુવૃત્તિપિશાચિકાભિઃ ।
આભિઃ કથં પરિભવો ભગવન્નમીષાં
    અન્તર્નિષીદતિ ભવાન્ ખલુ શૂલપાણિઃ ॥ ૧॥

દર્પસ્મરપ્રભૃતિદાવવિદહ્યમાનં
    લોકં વિલોક્ય કૃપયેશ કૃપાં તવાસ્મિન્ ।
વાઞ્છન્તિ યાન્તિ ચ મુદં વયમેતદાપત્
    ત્યક્તાઃ કિલેતિ શરણીકૃત તાવકાખ્યાઃ ॥ ૨॥

કાયસ્ય હેયનિધિતાં મૃતિરુગ્જરાર્ત્યા-
    ધાનન્ત્યમપ્યલમવેત્ય વિમુક્તસર્વાઃ ।
શમ્ભો ચરન્તિ વિરુજસ્ત્વયિ બધ્દભાવાઃ
    યે સાદરાસ્તવ હિ નામ્નિ મહાનુભાવાઃ ॥ ૩॥

ત્વન્નામકીર્તનવરૌષધમાશ્રિતેઽસ્મિન્
    અસ્મૈ ખલુ સ્મરહર સ્વદસે ત્વમેકઃ ।
અન્યત્તુ કિઞ્ચિદપિ ન સ્વદતે તદેતત્
    આખણ્ડલસ્ય પદમસ્તુ વિધેઃ પદં વા ॥ ૪॥

આકાઙ્ક્ષિતું કમલજાદિભિરપ્યલભ્યં
    આપ્નુઞ્ચ તન્નિરુપહત્યથ વર્તિતુઞ્ચ ।
સન્મૌળિલાળનપદં પદમીશ તે કિં
    ગૌરીશ યે ત્વદભિધા નરતાસ્તદન્યે ॥ ૫॥

એકં ભવદ્ભજનમેવ સુખં તદન્યત્
    આર્ત્યાત્મકં સકલમેતદિતિ પ્રબોધ્દુમ્ ।

સ્થાતું ચ મુક્તસકલં ભવદેકતાનં
    ઈશાસ્ત એવ શિવ યે તવ નામ્નિ સક્તાઃ ॥ ૬॥

દુઃખાત્મકત્વમખિલસ્ય તવાતિવેલા-
    નન્દાત્મતાઞ્ચ સમવેત્ય ઝટિત્યશેષમ્ ।
ત્યક્ત્વાઽનલાર્ત વપુષઃ સરસીવ શમ્ભો
    ત્વય્યાપતન્તિ સમુપાશ્રિત તાવકાખ્યાઃ ॥ ૭॥

આખ્યાપરાસ્તવ વિભો ભવદાત્મકત્વં
    અસ્યાખિલસ્ય તવ ચિત્સુખરૂપતાઞ્ચ ।
આબુધ્ય બધ્દહૃદયાસ્તવ શર્મ
    વિન્દન્ત્યન્તઃ કિમપ્યગણિત દ્રુહિણાદિભોગાઃ ॥ ૮॥

દ્વેષ્ય પ્રિયાદિ સકલં ભવદીયરૂપં
    બુધ્દ્વા ત્વયિ પ્રણયતઃ પ્રણયાર્દ્રદૃષ્ટ્યા ।
પશ્યન્ત એતદવલમ્બિત તાવકાખ્યાઃ
    પશ્યલ્લલાટ વિચરન્તિ જગત્ પુનન્તઃ ॥ ૯॥

રાગાદિકૃદ્વિવિધમેષ મહાનટઃ
    ખલ્વાનૃત્યતીત્થમિતિ તત્ત્વદૃશેક્ષમાણાઃ ।
ક્ષોભં ન યાન્તિ દધતે ચ મુદં સ્મરન્તઃ
    ત્વદ્વૈભવં ત્વદભિધાન નિબદ્ધભાવાઃ ॥ ૧૦॥

શમ્ભો કથં નુ ચતુરાસ્તવ નામ્નિ સક્તાઃ
    શશ્વત્કૃતેઽપ્યપદ એવ પરાભવેઽન્યૈઃ ।
અસ્તોદ્યમાઃ પ્રતિકૃતાવપયાત્વમીષામેષા
    કદાઽઽર્તિરિતિ તેષુ દયાં વહન્તિ ॥ ૧૧॥

ત્વન્નામધેયસિકાસ્તરુણેન્દુમૌળે
    દુઃખં ન યાન્તિ કિમપીતિ હિ વાદમાત્રમ્ ।
તેઽમી કિલ સ્વવિપદીવ વહન્તિ દુઃખં
    દૃગ્ગોચરં વ્રજતિ દુઃખિનિ જન્તુમાત્રે ॥ ૧૨॥

સર્વત્ર વત્સલતયા ત્વદવેક્ષયા ચો-
    દારા મહાન્ત ઇતિ ધીનિગળેન મુક્તાઃ ।
પ્રેમ્ણા ખલુ ત્વયિ વિભો તૃણિતાખિલાર્થાઃ
    ત્વન્નામધેયરસિકાઃ કૃતિનો જયન્તિ ॥ ૧૩॥

નાથ ત્વદીક્ષણવશાદખિલેષ્વમીષુ
    ન ક્વાપ્યગૌરવદૃગાત્મનિ તુ પ્રકામમ્ ।
નૈચ્યગ્રહસ્ત્વયિ તુ રક્તિરનર્ગળેતિ
    ક્વાધીતવન્ત ઇદમાદૃત તાવકાખ્યાઃ ॥ ૧૪॥

અત્યુન્નતિં વિતરતીતિ યથોઽતિવેલં
    અસ્યાશ્ચકાસ્તિ શિવ તાવકનામ્નિ સક્તેઃ ।
આખ્યાયતાં કિમિયમાતનુતે નિતાન્તં
    આનમ્રમેતમખિલેષુ ચરાચરેષુ ॥ ૧૫॥

ત્વન્નામકીર્તનજુષોઽનિશમેકતાનાઃ
    ત્વત્સેવનં વિદધતોઽપિ ન તત્ર તૃપ્તિમ્ ।
વિન્દન્તિ હન્ત સતિ વિઘ્નલવે ભવન્તિ
    વહ્નિપ્રવેશ ઇવ દુસ્સહતાપભાજઃ ॥ ૧૬॥

અસ્તસ્પૃહં મુનિમહં સમદર્શનં સ-
    મન્વેમિ તચ્ચરણપદ્મરજોભિલાષાત્ ।
ઇત્યાદિ તાક્કગિરાં ગિરિશાસ્પદં ત્વત્
    આખ્યાપરાઃ પુનરમૂનવિતું ક્ષમઃ કઃ ॥ ૧૭॥

ત્વત્સૌહૃદાદિ સુગુણામૃતશીતળાસ્ત્વત્
    આખ્યાપરા ઇતિ તવેશ યશોઽભિગોપ્તુમ્ ।
અસ્માનપિ ત્વદભિધાન જુષો જુષસ્વ
    સ્વચ્છં યશસ્તદપદે નનુ માઽપનૈષીઃ ॥ ૧૮॥

ક્રોધસ્મરાદ્યુપશમં ત્વયિ રાગિતાઞ્ચ
    દેહીશ મે ન યદિ મે શ્વમુખેભ્ય એભ્યઃ ।
કિં ભેદકં ત્વદભિધાં મમ ગૃહ્ણતોઽસ્ય
    ફલ્ગુસ્થિતિસ્ત્વદયશોભરહેતુરેષા ॥ ૧૯॥

ત્વન્નામકીર્તન સુધારસધારયાઽસ્ત-
    વિચ્છેદયા ભૃશવિશૃઙ્ખલસૌહિતીકઃ ।
વેધાન્તરાણ્યકલયન્ વિચરાણિ સોઽહં
    શાન્તઃ કદા શશિવતંસ તવ પ્રસાદાત્ ॥ ૨૦॥

મત્પ્રાણવલ્લભ મદીયનિધે મદાત્મન્

સામ્બ પ્રભો શિવ શશાઙ્કવિભૂષણેતિ ।
ત્વન્નામદીવ્યદમૃતોદધિવીચિડોળા-
ન્દોળૈર્વિધેહિ વિરુજં કૃપયા વિભો મામ્ ॥ ૨૧॥

ઇતિ શ્રી શ્રીધરવેઙ્કટેશાર્ય કૃતિષુ શિવભક્તલક્ષણં સમ્પૂર્ણમ્ ।

---

*shivabhaktalakShaNam by ShridharavenkatArya*

pdf was typeset on April 28, 2023

Please send corrections to *sanskrit@cheerful.com*